## संस्कृतं भक्षाः । (१६/१२१७)

तत्र इति सप्तमीसमर्थात् संस्कृतम् इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यत् संस्कृतं भक्षाः चेत् [1]ते भवन्ति । खरविशदम्[2]अभ्यवहारार्थं [3]भक्षमित्युच्यते । सत उत्कर्षाधानम् संस्कारः । भ्राष्ट्रे संस्कृता भक्षाः भ्राष्ट्रा अपूपाः । [4]कालशाः । [5]कौम्भाः । भक्षाः इति किम् ? पुष्पपुटे [6]संस्कृतो मालागुणः ॥

## शूलोखाद्यत् । (१७/१२१८)

शूलशब्दाद् [7]उखाशब्दाच्च[8] सप्तमीसमर्थात् संस्कृतं [9]भक्षाः इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति । अणोऽपवादः । शूले संस्कृतं शूल्यं मांसम् । [10]उख्यम् ॥

## दध्नष्ठक् । (१८/१२१९)

दधिशब्दात् सप्तमीसमर्थात् संस्कृतं [11]भक्षाः इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । [12]दधनि संस्कृतं दाधिकम् । ननु च संस्कृतार्थे प्राग्वहतेः ठकं (४.४.१/१५४८) वक्ष्यति, तेनैव [13]सिद्धम्[14] ? न सिध्यति । दध्ना हि [15]तत् संस्कृतं यस्य दधिकृतमेवोत्कर्षाधानम्, इह [16]तु दधि केवलमाधारभूतं, द्रव्यान्तरेण लवणादिना[17] संस्कारः क्रियते ॥

## उदश्वितोऽन्यतरस्याम् । (१९/१२२०)

उदश्विच्छब्दात् सप्तमीसमर्थात् संस्कृतं [18]भक्षाः इत्येतस्मिन्नर्थे अन्यतरस्यां ठक् प्रत्ययो भवति, पक्षे यथाप्राप्तमण्[19] भवति । औदश्वित्कम्, औदश्वितम् ॥

## क्षीराड् ढञ् । (२०/१२२२)

क्षीरशब्दात् सप्तमीसमर्थात् [20]संस्कृतं भक्षाः इत्येतस्मिन्नर्थे ढञ् प्रत्ययो भवति । अणोऽपवादः । [21]क्षीरे संस्कृता क्षैरेयी यवागूः ॥

## साऽस्मिन् पौर्णमासीति सञ्ज्ञायाम् । (२१/१२२३)

सा इति प्रथमासमर्थाद् अस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति, यत् तत् प्रथमासमर्थं पौर्णमासी चेद् [22]भवति । इतिकरणः ततश्चेद् विवक्षा भवति । सञ्ज्ञायाम् इति समुदायोपाधिः, [23]प्रत्ययान्तेन [24]चेत् सञ्ज्ञा गम्यते इति । मासार्धमाससंवत्सराणामेषा सञ्ज्ञा । पौषी पौर्णमासी अस्मिन्[25] पौषो मासः ।

---

1. तद् भवति ग. फ. 2. अभ्यवहार्यं ब. क. फ. 3. भक्षशब्देन फ. 4. कालशाः भक्षा इति क. ह. 5. कौम्भाः नास्ति फ. 6. संस्कृताः मालाः फ. 7. उखशब्दात् फ, उखा इति पात्रविशेषः इत्यधिकम् फ. 8. प्रातिपदिकात् इत्यधिकम् ह. 9. भक्षाः नास्ति फ. 10. उखायां चेत् इति उख्यम् ह. 11. भक्षाः नास्ति फ. 12. दध्ना संस्कृतम् फ. 13. सिध्यति क. 14. अपि इत्यधिकम् ह. 15. तत् नास्ति फ. 16. खलु ब. 17. अत्र इत्यधिकम् ह. 18. भक्षाः नास्ति क. फ. 19. एव इत्यधिकम् क. फ. ब. 20. संस्कृतं भक्षाः नास्ति क. 21. क्षीरे संस्कृता नास्ति फ. 22. सा भवति ह. ड. 23. यदि इत्यधिकम् फ. 24. चेत् नास्ति फ. 25. मासे इत्यधिकम् फ.